भगवान् विष्णुर्देवदेवो जनार्द्दनः। गतः कैलासशिखरमालयं शङ्करस्य च” २६४स० अध्यायावधिके २८१अध्यायपर्य्यन्ते ग्रन्थे। उपसंहारे अनुक्रमणिकाध्याये “कैलासयात्रा कृष्णस्य पौण्ड्रकस्य वधस्तथा” इत्युक्तं तेन गौड़पुस्तके कैलासयात्राग्रन्थाभावः प्रामादिक एव

**कैलासौकस्** पु० कैलास ओको यस्य। १शिवे २कुवेरे च हेमच०

**कैवर्त्त** पुंस्त्री के जले वर्त्तते वृत–अच् अलुक् स० ततः स्वार्थे अण्। “निषादो मार्गवं सूते दासं नौकर्म्मजीविनम्। कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः” मनूक्तायां (जेले) धीवरजातौ। “ब्राह्मणेन शूद्रायां जातो निषादः प्रागुक्तः प्रकृतायामायोगव्यां मार्गवं दाशापरनामानं नौव्यवहारजीविनं जनयति। आर्य्यावर्त्तदेशवासिनः तं कैवर्त्तशब्देन कीर्त्तयन्ति” कुल्लू०

**कैवर्त्तमुस्त** न० के जले वर्त्तते वृत–अच् अलुक्स० स्वार्थे अण् कर्म्म०। मुस्तकभेदे (केसुरिया) शब्दर० स्वार्थे क। तत्रार्थे भरतः [प्रसिद्धे लताभेदे वस्त्ररञ्जनायाम् राजनि०

**कैवर्त्तिका** स्त्री कैवर्त्तीव इवार्थे कन् ह्रस्वः। मालवदेश

**कैवर्त्तिमुस्तक** न०। कैवर्त्त्याः कैवर्त्तपत्न्याः प्रियं मुस्तकं संज्ञायां “ङ्यापोः” पा० वा ह्रस्वः। कैवर्त्तमुस्तके मुस्ताभावे कैवर्त्तीमुस्तकमप्यत्र (केसुरया) ख्याते मुस्तकभेदे भरतः

**कैवर्त्ती** स्त्री के जले वर्त्तते वृत-अच् अलुक्स० कैवर्त्ता जलस्थास्तेव स्वार्थे अण् ङीप्। (केसुरिया) १मुस्तकभेदे वैद्यकम् पुंयोगे ङीप्। २कैवर्त्तपत्न्याञ्च [विष्णुके रत्नमा०

**कैवल** न० के वलते वल–अच् अलुक् स० स्वार्थे अण्।

**कैवल्य** न० केवलस्य भावः ष्यञ्। १आत्यन्तिकदुःखविगमरूपे मुक्तिभेदे तत्स्वरूपसत्त्वादिकारणानि च सां०का०तत्त्वकौमुद्योर्दर्शितानि यथा “पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च “इतश्चास्ति पुरुष इत्याह कैवल्यार्थं प्रवृत्तेश्च शास्त्रकाराणां महर्षीणाञ्च दिव्यलोचनानां कैवल्यमात्यन्तिकदुःखत्रयप्रशमलक्षणं न बुद्ध्यादीनां सम्भवति ते हि दुःखाद्यात्मकाः कथं स्वभावाद्वियोजयितुं शक्यन्ते तदतिरिक्तस्य त्वतदात्मन आत्मनस्ततो वियोगः शक्यस्तस्मादः तस्मात्कैवल्यार्थं प्रवृत्तेरागमानां महर्षीणाञ्चास्ति बुद्ध्यादिव्यतिरिक्त आत्मेति सिद्धम्” तत्त्वकौमुदी “कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्त्तृभावश्च” सां०का० “आत्यन्तिकदुःखत्रयाभावः कैवल्यं तच्च स्वभावादेव त्रैगुण्यात् सुखदुःखमोहरहितत्वात् सिद्धम्” कौ०

“पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य” का० “पुरुषतत्रापेक्षां दर्शयति पुरुषस्य कैवल्यार्थम्। तथा हि प्रधानेन सम्भिन्नः पुरुषस्तद्गतं दुःखत्रयं स्वात्मन्यभिमन्यमानः कैवल्यं प्रार्थयते तच्च सत्वपुरुषान्यताख्यातिनिबन्धनम्। न च सत्वपुरुषान्यताख्यातिः प्रधानमन्तरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षते। अनादित्वाच्च संयोगगणपरम्परायाः भोगाय संयुक्तोऽपि कैवल्याय पुनः संयुज्यते इति युक्तम्” त० कौ० विवृतञ्चैतदस्माभिः “व्यवहितमपि पुरुषस्येति पदं कैवल्यार्थमित्यत्रान्वेतीत्याख्यातुं पुरुषस्यापेक्षामुत्थापयति पुरुषस्यापेक्षामिति प्रकृतेरिति शेषः। कैवल्यं केवलीभावः स च अनुभूयमानस्य बुद्धिधर्मस्य दुःखत्रयस्य विनाश एव, तदर्थं तदुद्देशेन पुरुषस्य प्रकृत्यपेक्षा। तथा हि इष्टविषयेच्छया इष्टसाधनाय प्रवर्त्तमानो दृष्टः। पुरुषस्य आत्मन्यनुभूयमानं दुःखत्रयं जिहासुस्तत्परिहारसाधनमर्थयते दुःखत्रयाभिघातस्य प्रकृतिपुरुषविवेकाधीन इति प्रकृतिं विना कथङ्कारं पुरुषस्तद्भेदमात्मनि प्रतीयादिति दुःखत्रयाभिघातार्थमपेक्षणीयज्ञानसाधनत्वेन पुरुषस्य प्रकृत्यपेक्षा”।

“सम्यग्ज्ञानाधिगमाद्धर्म्मादीनामकारणप्राप्तौ। तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः” सां० का० “तत्त्वसाक्षात्कारोदयादेवानादिरप्यनियतविपाककालोऽपि कर्म्माशयप्रचयो दग्धबीजभावतया न जात्याद्युपभोगलक्षणाय फलाय कल्पते। क्लेशसलिलावसिक्तायां हि बुद्धिभूमौ कर्म्मबीजान्यङ्कुरं प्रसुवते तत्त्वज्ञाननिदाघनिपीतसकलक्लेशसलिलायामूषरायां कुतः कर्म्मबीजानामङ्कुरप्रसवः। तदिदमुक्तं धर्म्मादीनामकारणप्राप्ताविति अकारणत्वप्राप्तावित्यर्थः। उत्पन्नेऽपि तत्त्वज्ञाने च संस्कारवशात्तिष्ठति यथोपरतेऽपि कुलालव्यापारे चक्रं वेगाख्यसंस्कारवशाद्भ्रमत्तिष्ठति कालपरिपाकवशात्तूपरते संस्कारे निष्क्रियं भवति। शरीरस्थितौ च प्रारब्धपरिपाकौ धर्म्माधर्म्मौ संस्कारौ। तथा चानुश्रूयते “भोगेन त्वितरे क्षपयित्वाथ सम्पद्यते” इति “तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये” इति। प्रक्षीयमाणाविद्याविशेषस्य संस्कारस्तद्वशात्तत्सामर्थ्याद्धृतशरीरस्तिष्ठति” त० कौ० विवृतमेतदस्माभिः—

“इतरे उत्पन्नविवेकज्ञानाः भोगेन प्रारब्धकर्म्माणीति शेषः क्षपयित्वा नाशयित्वा समाप्येति यावत् अथ—प्रारब्धक-